# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, नवम्बर्-दिसम्बर्-२०१६

| | | |
|---|---|---|
| कक्षा- आचार्य-२ (SEM-3) | प्रश्नपत्र-४ | गुणा: - ७० |
| विषय:- साहित्यम्-काव्यवर्ग: | CC-539(3) | समय: - ११ त: ०२ |
| दिनाङ्क: - २८/११/२०१६ | सन्दर्भग्रन्थ: - नैषधीयचरितम् | |

॥ प्रथमान्विति: ॥

**प्र-१ निम्नलिखितेषु एकस्य ससन्दर्भं व्याख्यां कुरुत ।** ०४

१. अमुष्य विद्या रसनाऽग्रनर्तकी त्रयीव नीताऽङ्गगुणेन विस्तरम् ।
अगाहताऽष्टादशतां जिगीषया नवद्व्यद्वीपपृथग्जयश्रियाम् ॥

२. निवारितास्तेन महीतलेऽखिले निरीतिभावं गमितेऽतिवृष्टय: ।
न तत्यजुर्नूनमनन्यसंश्रया: प्रतीयभूपालमृगीदृशां दृश: ॥

**प्र-२ महाकवे: जीनववृत्तं लिखत ।** ०८

**अथवा**

**नैषधीयचरितस्य विशेषता: सप्रमाणं प्रतिपादयन्तु ।**

**प्र-३ अधोलिखितेषु त्रयाणां उत्तराणि लिखत ।** ०३

१. बृहत्त्रय्यां के ग्रन्था: सन्ति?

२. नैषधीयचरिते कति सर्गा: सन्ति?

३. ग्रन्थे क: प्रधान: रस:?

४. श्रीहर्षस्य मातु: नाम किम्?

५. प्रथमसर्गे कति श्लोका: सन्ति?

॥ द्वितीयान्विति: ॥

**प्र-४ अधोलिखितेषु एकस्य सप्रसङ्गं व्याख्या कुरुत ।** ०४

१. प्रयातुमस्माकमियं कियत्पदं धरा तदाम्भोधिरपि स्थलायताम् ।
इतीव वाहैर्निजवेगदर्पितै: पयोधिरोधक्षममुत्थितं रज: ॥

२. विधाय मूर्ति कपटेन वामनीं स्वयं बलिध्वंसिविडम्बिनीभयम् ।
उपेतपार्श्वश्चरणेन मौनिना नृप: पतङ्गं समधत्त पाणिना ॥

**प्र-५ श्रीहर्षस्य रसच्छन्दोऽलंकारभावविवेचनं कुरुत ।** ०८

**अथवा**

**ग्रन्थानुगतं श्रीहर्षस्य पाण्डित्यं विवेच्यताम् ।**

**प्र-६ अधोलिखितेषु त्रयाणां उत्तराणि यच्छत ।** ०३

१. ग्रन्थे प्रधाननायिका का?

२. नल: कीदृश: नायक: अस्ति?

३. किं विद्वदौषधम्?

४. ग्रन्थे कस्य गुणगानस्य वर्णनम् अस्ति?

५. अधर्मोऽपि कथं तपस्वितां दधौ?

## ॥ तृतीयान्वितिः ॥

**प्र-७ अधोलिखितेषु एकस्य ससन्दर्भं भावार्थं लिखत ।** **०४**

१. न सुवर्णमयी तनुः परं ननु किं वागपि तावकी तथा ।
न परं पथि पक्षपातिताऽनवलम्बे किमु मादृशेऽपि सा ॥

२. अमृतविद्युतिलक्ष्म पीतया मिलितं यद्बलभीपताकया ।
बलयायितशेषशायिनः सखितामादित पीतवाससः ॥

**प्र-८ द्वितीयसर्गस्य सारः लेख्यः ।** **१२**

**अथवा**

**प्रथमसर्गे कवेः काव्यकौशलं वर्णयत ।**

**प्र-९ अधोलिखितेषु द्वयोः उत्तरं यच्छत ।** **०४**

१. श्रीहर्षस्य के के ग्रन्थाः सन्ति?

२. भीमनरेन्द्रनन्दना का?

३. काः चतुर्दश विद्याः?

## ॥ चतुर्थान्वितिः ॥

**प्र-१० एकस्य सप्रसङ्गं भावार्थं लिखत ।** **०४**

१. हंस तनौ सन्निहितं चरन्तं मुनेर्मनोवृत्तिरिव स्विकायाम् ।
ग्रहीतुकामादरिणा शयेन यत्नादसौ निश्चलतां जगाहे ॥

२. आदर्शतां स्वच्छतया प्रयासि सतां स तावत्खलु दर्शनीयः ।
आगः पुरस्कुर्वति सागसं मां यस्यात्मनीदं प्रतिबिम्बितं ते ॥

**प्र-११ नायिकानायिकयोः पात्रपरिचयं यथाग्रन्थं लिखत ।** **१२**

**अथवा**

**उदिते नैषधे काव्ये क्व माघः क्व च भारविः - यथाग्रन्थं वर्णयत ।**

**प्र-१२ द्वयोः उत्तरं यच्छत ।** **०४**

१. कः महसां राशिः महोज्ज्वलः आसीत्?

२. धीरोदात्तस्य किं लक्षणम्?

३. नलस्य दृशां किं तर्जितम्?